योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०६७

सप्तषष्टितमः सर्गः ६७

दशरथ उवाच ।

मुनिनायक तं भिक्षुं गत्वा संबोधयन्त्वमी ।

नरा मत्प्रहिताः शीघ्रं चानयन्तु कुटीगतम् ।। १

श्रीवसिष्ठ उवाच ।

राजंस्तस्य महाभिक्षोः स देहः प्राणवर्जितः ।

क्लेदो वैवर्ण्यमायातो नासौ जीवितभाजनम् ।। २

तस्य भिक्षोस्तु जीवोऽसौ भूत्वा पद्मजसारसः ।

जीवन्मुक्तः स्थितो भूयो नासौ संसृतिभाजनम् ।। ३

तद्गृहे मासपर्यन्ते बलान्निष्कासितार्गलाः ।

अन्तराले तु तिष्ठन्ति भृत्या भिक्षुदिदृक्षवः ।। ४

ततो नष्टाङ्गसंधानं कायं निष्काल्यते जले ।

त्यक्ष्यन्त्यन्यं करिष्यन्ति भिक्षुमक्षुण्णमानसम् ।। ५

अनेनैवं सदेहेन भिक्षुर्मुक्तो व्यवस्थितः ।

कथं प्रबोध्यते नष्टं तद्विहारे शरीरकम् ।। ६

एषा गुणमयी माया दुर्बोधेन दुरत्यया ।

नित्यं सत्यावबोधेन सुखेनैवातिवाह्यते ।। ७

असत्येव कृतारम्भा हेम्नः कटकता यथा ।

प्रतिभासविपर्यासमात्रकारणकोदया ।। ८

परमात्मनि वाचेयमित्थं मायानुमीयते ।

तरङ्गालीव पयसि प्रेक्षामात्रविनाशिनी ।। ९

ज्ञो हि दृश्यतया दीर्घस्वप्नात्स्वप्नान्तरं व्रजेत् ।

एवं जीवत्वमायाति विवेकात्सर्वमात्मदृक् ।। १०

यो यस्य प्रतिभासः स्यादात्मैव स स्वबोधतः ।

स एवोदेति संसारः करञ्जवनगुल्मदृक् ।। ११

प्रत्येकं भूतमुदितं कृतं संसारमण्डलम् ।

भिक्षोः स्वप्नान्तर इव परां भङ्गिमिवाम्भसः ।। १२

प्रस्तुतः पद्मजादेव जगत्स्वप्नो यथोदितः ।

तथैवास्वच्छचित्तोत्थो रूढः सर्वजनं प्रति ।। १३

पितामहवदाभाति सर्गः स्वप्नविलासवत् ।

प्रत्येकमुदितस्तेन ब्रह्माण्डानीव कोटिशः ।। १४

स्फुरन्यथा तथा वास्मिञ्जीवः पश्यति विभ्रमम् ।

हृदयेऽयं समर्थं च स्वप्नवद्दीर्घमान्तरम् ।। १

चित्सत्तामात्रमासाद्य प्रतीतिच्युतमात्रतः ।

जरामरणदुःखानां क्वचिद्भ्राजनतां गतः ।। १६

पातालं ब्रह्मलोकं वा चित्तत्सुकृतशालिनी ।

चित्तांशस्पन्दमात्रेण कृत्वा कृत्वेव संस्थिता ।। १७

चित्स्पन्दरूपिणी जीवनामरूपं गतात्मनि ।

अन्यत्र च विलुठति गत्वा संभ्रमहारिणी ।। १८

चित्तेति परमात्मा न परमात्मा न वा न किम् ।

जीवदेहादिनाम्नोऽस्य प्रतिबिम्बादिवार्हता ।। १९

ब्रह्मण्येव परं ब्रह्म जगदृष्ट्यैव संस्थितम् ।

शुद्धाकाशमिवाकाशे जले जलमिवामलम् ।। २०

लोको ब्रह्मण एवायं जगद्रूपेषु तिष्ठति ।

बिभेत्यन्यतया बोधात्प्रतिबिम्बादिवार्भकः ।। २१

स्पन्देऽस्पन्दीकृते चेह स्वतः संज्ञा विलीयते ।

साप्यलं परिणामेन लीयतेऽग्नौ घृतं यथा ।। २२

चित्स्पन्द एव चित्स्पन्दे सर्वात्मनि विजृम्भितः ।

स्पन्दास्पन्दौ जृम्भणादि कल्पितं नात्र वास्तवम् ।। २३

न स्पन्दोऽस्तीह नास्पन्दो नैकता वापि न द्विता ।

शुद्धं चिन्मात्रसर्वस्वं यथैवास्ति तथा स्थितम् ।। २४

सारेण तु विचारेण सर्वशब्दार्थयोः समे ।

चिन्मात्रमेव ज्ञातेयं नास्तीत्यपि न विद्यते ।। २५

भेदवेदनयोदेति भेदः प्रकृतिलाञ्छनम् ।

अभेदबोधादखिले गलिते शिष्यते परम् ।। २६

नानातैवास्य बोधेन स बोधस्त्वनवेक्षणात् ।

पृच्छकं चैवमस्त्येव तस्मान्निःशङ्कता परा ।। २७

ततः स्वप्नो न जागर्तिर्न सुषुप्तिर्न तुर्यता ।

न बन्धोस्ति न मोक्षोस्ति नान्यथाकल्पनात्मकम् ।। २८

शान्तिरेका जगन्नाम्नी शान्तिरेवमवस्थिता ।

अबोधोऽसत्य एवातः क्व द्रष्टृदृश्यदर्शनम् ।। २९

स्पन्दोऽप्यस्पन्द एव स्यान्निःसंकल्पतया च ते ।

न स्पन्दास्पन्दयोर्भिन्ना संकल्परहितैव चित् ।। ३०

द्वैतैक्यविकला रूपसंकल्पश्चिदभावनात् ।

स च भावनमात्रेण गतो ब्रह्मैव शिष्यते। ।। ३१

चिच्चन्द्रबिम्बे संकल्पकलङ्कः स्फुरतीव यः ।

नासौ कलङ्कस्तद्विद्धि चिद्धनस्य घनं वपुः ।। ३२

चिद्धनस्य न सन्नासन्स्थीयतां यत्तते पदे ।

इत्यदोषमहाबोधसारसंग्रहणं कृतम् ।। ३३

चिच्चन्द्रबिम्बासंकल्पकलङ्कामृतविग्रहः ।

त्वया भव्येन संस्पृष्टो भावाभावक्षयात्मना ।। ३४

भावाभावादिकलनां नीत्वा चिन्मयतां चितः ।

समोल्लासविलासान्तः समाश्वस यथासुखम् ।। ३५

स्पन्दास्पन्दौ कल्पनाकल्पना वा

चित्ताम्नायो विद्धि नामाब्धिनाम्ना ।

सर्वाकारा निर्वृतिः शान्तिसत्ता

पूर्णापूर्णे ह्येकमेवास्थितेति ।। ३६

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० निर्वाणप्रकरणे पू० ब्रह्मैक्यप्रतिपादनं नाम सप्तषष्टितमः सर्गः

।। ६७ ।।